दाखल क्र. M2257 विषय पुराण

नाव श्रीकृष्णचरित्र CMSS.

लेखक / लिपीकार श्री बाळशास्त्री हरदास

पृष्ठ २९ काळ – पूर्ण / ~~अपूर्ण~~

विषयप्रवेशः (प्रथमः परिच्छेदः) १

* १ नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥ महाभारते आदिमः श्लोकः

अस्त्ययं श्रीमद्भगवद्गीताग्रंथः अस्मद्धर्मग्रंथेष्वेकः तेजस्वितमो निर्मलश्च हीरकः। पिण्डब्रह्माण्डज्ञानपूर्वकमात्मविद्यायाः गूढानि पवित्राणि च तत्वानि संक्षेपेण किन्त्वसंदिग्धतया निरूप्य तथा साधारणं मनुष्यं प्रति आध्यात्मिकपूर्णावस्थायाः नाम परमपुरुषार्थस्य परिचायकः, तत्सम्भवतमेव भक्तिज्ञानेन अन्ते तयोर्द्वयोरपि शास्त्रतः प्राप्तेन व्यवहारेण साकं सोपपत्तिकं कमनीयं च समन्वयं कुर्वन् संसारे विभ्रमितानां शान्तिसाधकः विशेषतश्च निष्कामकर्तव्याचरणप्रेरकः एतादृशोऽपरः अयं बालबोधको ग्रंथः न केवलं संस्कृतभाषायामेव अपि तु जगति वाङ्मयान्तरेष्वपि दुर्लभ एव। काव्यमालत्वेनापि परीक्षितश्च सदा बालवृद्धानाम् सुलभत्वेन प्रसादपूर्णया भाषया आत्मज्ञानसम्बन्धिनेक गूढ-सिद्धान्तावबोधकः ज्ञानभक्तिपरिपूर्णश्चायं ग्रंथः उत्तमकाव्येषु परिगण्यते। किमधिकं वक्तव्यं सकलवैदिकधर्मसारं श्रीभगवद्वाण्या यस्मिन् संग्रथितं तस्यास्य ग्रंथस्य योग्यता विषये। भारतीययुद्धसमाप्त्यनन्तरमेकस्मिन्दिने सप्रेमं संवदतोः श्रीकृष्णार्जुनयोः भगवन्मुखेन पुनः गीताश्रवणकामः पार्थः श्रीकृष्णमित्थं प्रार्थितवान् "युद्धारंभे भवता यदुपदिष्टं तन्मया विस्मृतम्, कृपया पुनश्च तथैव मामुपदिश"। तदानीं "स उपदेशः तदा योगयुक्ततमेन चित्तेन मयाकृतः, अतः पुनश्च तथैव प्रतिपादयितुमहमप्यशक्तः" इति भगवता प्रत्युक्तमित्यनुगीतारंभे निर्दिष्टम् (म. भा. अश्वमेधः अ. १६ श्लो. १०-१३)। वस्तुतः नास्ति किमप्यशक्यं भगवन्तं प्रति, किन्तु गीता पुनः कथयितुमशक्या इति भगवद्वचनेन कियदास्ति गीतायाः श्रेष्ठत्वमिति सुष्ठु अभिव्यज्यते। अनुमानतो आसार्धद्विसहस्रवर्षाद्यावधि ग्रंथोऽयं वैदिकधर्मान्तर्गतभिन्नभिन्नसम्प्रदायानां सर्वेषां समानतयैव वेदतुल्यो मान्यः प्रमाणत्वेन च स्वीकार्यः संजातः इत्यस्यापीदमेव बीजम्। अत एव —

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥

इत्यस्य स्मृतिकालीनस्य ग्रंथस्य गीताध्याने अलंकारयुतं किंतु यथार्थं वर्णनं कृतम्। सर्वासु भारतीयप्राकृतभाषासु अस्य अनेके अनुवादाः, टीकाः, निरूपणानि च संजातानि इत्यत्र तु न किमप्याश्चर्यं; किंतु पाश्चिमात्यानां

संस्कृतपरिचयानंतरं तेषां ग्रीक्, लॅटिन्, जर्मन्, फ्रेन्च, आंग्लादिभाषास्वपि गीतानुवादाननेकधा कृत्वा अस्य अप्रतिमग्रंथस्य प्रसिद्धया अधुना निखिलं जगद् व्याप्यते।

न केवलं सर्वोपनिषत्सारमस्मिन् ग्रंथे सन्निहितं किंतु संपूर्णमभिधानमप्यस्यास्ति "श्रीमद्भगवद्गीता–उपनिषत्" इति। प्रतिगीताध्यायान्ते अध्यायसमाप्तिदर्शकसंकल्पे "श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे" इत्यादि शब्दाः वर्तन्ते। यद्यप्ययं संकल्पो मूलभारतसंहितायां नोपलभ्यते तथापि प्रतिगीतापुस्तके तस्य उपलभ्यमानत्वात्, नित्यपाठार्थं यदा गीता महाभारततः प्रथमतः उद्धृता तदा प्रभृत्ययं संकल्पः, कस्यापि गीताटीकायाः प्रागेव, प्रचारसरणिमागतः इत्यनुमीयते। एतस्मात्कारणादस्य गीतातात्पर्यनिर्णये किं महत्वमिति तु अग्रे उपपादयिष्यामः। साम्प्रतं संकल्पगतस्य "भगवद्गीतासूपनिषत्सु" इति पदद्वयस्यैव विमर्शः क्रियते। अयं "उपनिषद्" शब्दो यद्यपि महाराष्ट्रभाषायां नपुंसकलिंगात्मकस्तथापि संस्कृते तस्य स्त्रीलिंगात्मकत्वात् "श्रीभगवता गीता नाम प्रतिपादिता उपनिषद्" इत्यर्थेन संस्कृतभाषायां "श्रीमद्भगवद्गीता उपनिषद्" इति विशेषणविशेष्य–रूपस्त्रीलिंगात्मकशब्दद्वयप्रयोगः क्रियते, ग्रंथश्च यद्यप्येक एव तथापि आदरार्थे बहुवचनप्रयोगस्य रूढत्वात् "श्रीमद्भगवद्गीता–सूपनिषत्सु" इति सप्तमी बहुवचनप्रयोगेण निर्दिश्यते। आचार्यभाष्ये अपि ग्रंथमिममुद्दिश्य "इति गीतासु" इति बहुवचनप्रयोगाः दृश्यन्ते। किंतु संक्षेपेण निर्देशावसरे आदरार्थकप्रत्ययं पदानि वा तथैव चान्तिमं "उपनिषद्" इति जातिवाचकं सामान्यशब्दमपि परित्यज्य केन,– –कठछान्दोग्येत्यादिसंक्षिप्ताभिधानानुसारं "श्रीमद्भगवद्गीता, उपनिषद्" इति पृथक् प्रथमान्तपदयोः प्रथमं "भगवद्गीता" अनंतरं च केवलं "गीता" इति स्त्रीलिंगात्मकमतिसंक्षिप्तं रूपं संजातम्। यदि हि अयं "उपनिषद्" शब्दः मूलग्रंथाभिधाने न स्यात् तर्हि अस्याभिधानं "भागवतम्", "भारतम्", "गोपीगीतम्" इत्यादि शब्दानामिव "भगवद्गीतम्" अथवा केवलं "गीतम्" इति नपुंसकलिङ्गात्मकमभविष्यत्। किंतु "भगवद्गीता" अथवा "गीता" इति स्त्रीलिंगात्मक–शब्दस्यैव तत्स्थाने स्थिरत्वात् तत्पुरतः "उपनिषद्" इति शब्दः

नित्यमध्याहृतो ज्ञातव्यः। अर्जुनमिश्रस्य अनुगीता टीकायां "अनुगीता" शब्दोऽपि एवमेव व्याख्यातः।

किंत्वयं गीताशब्दो न सप्तशतश्लोकात्मक-भगवद्गीतापर एव; अपि तु स्वल्पा बहवो ज्ञानपराः ग्रंथाः अपि तेनैव व्यपदिश्यमानाः दृश्यन्ते। महाभारते शान्तिपर्वान्तर्गत मोक्षपर्वणि कानिचित्स्वतंत्र प्रकरणानि पिंगल-गीता, शंपाक गीता, मंकिगीता, बोध्यगीता, विचख्यु गीता, हारीत गीता, वृत्रगीता, पराशर गीता, हंसगीता इति निर्दिष्टानि सन्ति; अश्वमेधपर्वणि अनुगीतैकदेशश्च "ब्राह्मणगीता" इति स्वातन्त्र्येण संज्ञितः अस्ति।

अपराश्चापि नैकविधाः अवधूत गीता, अष्टावक्रगीता, ईश्वरगीता, उत्तरगीता, कपिलगीता, गणेशगीता, देवीगीता, पाण्डवगीता, ब्रह्मगीता, भिक्षुगीता, यमगीता, रामगीता, व्यासगीता, शिवगीता, सूतगीता, सूर्यगीता इति गीताः विख्याताः। एतासां मध्ये कतिपय गीतानां स्वातन्त्र्येण निरूपणं दृश्यते(?) तास्च भिन्नभिन्न पुराणान्तर्गताः सन्ति। निदर्शनार्थमत्र किंचित् प्रपञ्च्यते। गणेशगीता गणेशपुराणस्य चरमे क्रीडाखण्डे १३६-१४८ अध्यायेषु निर्दिष्टा सा च अल्पशः शब्दभेदेन भगवद्गीतायाः प्रतिबिम्बमिति वक्तुं शक्यते। ईश्वरगीता कूर्मपुराणोत्तरभागे आदितः एकादशाध्याये-ष्वागता ततो अग्रिमाध्याये च व्यासगीता प्रारब्धा, तथैव च स्कंदपुराणान्तर्गत सूतसंहितायाः चतुर्थे नाम्नि यज्ञवैभवखण्डे उपरिभागे आदितः द्वादशाध्यायपर्यन्तं ब्रह्मगीता तदनंतरमष्टस्वध्यायेषु सूतगीता वर्तते। स्कंदपुराणान्तर्गत ब्रह्मगीतातो भिन्ना अपरैका ब्रह्मगीता योगवासिष्ठान्तर्गत निर्वाण प्रकरणोत्तरार्धे १७३ सर्गात् १८१ सर्गपर्यन्तं वर्तते। यमगीताऽपि त्रिविधा अस्ति। प्रथमा विष्णुपुराणस्य तृतीये अंशे सप्तमाध्याये, द्वितीया अग्निपुराणस्य तृतीयखण्डे ३८१ इत्यध्याये, तृतीया च नृसिंहपुराणस्य अष्टमाध्याये वर्तते। रामगीता अपि तथैव। अस्मत्प्रदेशे यस्याः प्रचारः सा रामगीता अध्यात्म रामायणस्य उत्तरकांडे पञ्चमसर्गे निर्दिष्टा तच्च अध्यात्मरामायणं ब्रह्माण्डपुराणस्यैकदेशः इति सर्वसम्मतम्। किंत्वपराऽपि, रामगीता मद्रदेशप्रसिद्धे "गुरुज्ञानवासिष्ठतत्वसारायण" ग्रंथे वर्तते।

अयं ग्रंथः वेदान्तप्रतिपादकः ज्ञानोपासना कर्माख्यकाण्डत्रयात्मकः । तत्र
उपासनाकाण्डस्य द्वितीयपादे आदितः अष्टादशाध्यायेषु
रामगीता, तृतीयस्य कर्मकाण्डस्य च तृतीयपादे प्रथमतः
पञ्चमाध्यायपर्यन्तं सूर्यगीता निरूपिता । शिवगीता
पद्मपुराणस्य पातालखण्डे वर्तते इति वदन्ति ; किंतु
पुण्यपत्तनस्थे आनन्दाश्रम मुद्रणालये मुद्रिते अस्मिन्पुराणे
शिवगीता नोपलभ्यते । गौडीय पद्मोत्तर पुराणे सा
उपलभ्यते इति पंडित ज्वालाप्रसादैः स्वकृते "अष्टादशपुराण दर्शन"
इत्यस्मिन्ग्रन्थे निर्दिष्टम् तथा च नारद पुराणे अन्यपुराण-
समवेतं पद्मपुराणस्य अपि या विषयानुक्रमणिका निर्दिष्टा
तस्यामपि शिवगीता निर्देशो वर्तते । तथा च श्रीमद्-
भागवतपुराणे एकादशस्कंधे त्रयोदशाध्याये हंसगीता
त्रयोविंशत्यध्याये च भिक्षुगीता वर्तते । कैश्चन च
तृतीयस्कंधांतर्गत कापिलेयोपाख्यानमपि 'कापिलगीता' इति
वर्णयन्ति ; किंतु 'कापिलगीता' ख्यो अपरः स्वतन्त्र एव
मुद्रितो ग्रंथः अस्माभिरवलोकितः । इयं कापिलगीता
हठयोगप्रधाना, पद्मपुराणात् उद्धृता इति तत्र उल्लिखितम् ;
परं पद्मपुराणे सा नोपलभ्यते । इदमेव न किन्त्वस्मिन्ग्रंथे
अन्यतमस्थले (अ. ७) जैन जंगम (लिंगायत साम्प्रदायिकाः)
सोफी यवनानांच (महम्मदीया : साधवः) उल्लेखः अस्ति ।
अतः इयं गीता महम्मदीय राज्यस्थापनादनंतरं रचिता
इति स्पष्टम् । भागवत पुराणवत् देवीभागवतस्यापि सप्तमस्कन्धे
३१ अध्यायात् ४० अध्यायपर्यंत एका गीता वर्तते ।
तस्याः देव्या कथितत्वात् "देवीगीता" इति नाम । अन्यच्च
प्रत्यक्षं भगवद्गीतायाः सारं अग्निपुराणस्य तृतीयखण्डे
३८० इत्यध्याये गरुड पुराणस्य च पूर्वखण्डे २४२
इत्यध्याये दत्तमास्ते । तथैव च यद्यपि "योगवासिष्ठ
ग्रन्थे" वसिष्ठमहर्षिभिः रामाय कथितः इत्युच्यते तथापि
तस्मिन्नेवार्जुनोपाख्याने श्रीकृष्णावतारे भगवता अर्जुनाय
प्रतिबोधितायाः भगवद्गीतायाः सारं, भगवद्गीतान्तर्गतानेक-
श्लोकान् यथावदुद्धृत्य चरमे निर्वाणप्रकरणे सङ्कलितम् ।
(योग. ६ पू. सर्ग ५२-५८) । पुण्यपत्तने मुद्रिते
पद्मपुराणे शिवगीता नोपलभ्यते इति उपरि निर्दिष्टमेव ।
यद्यपि शिवगीता नोपलभ्यते तथाप्यस्मिन् पुस्तके
उत्तरखण्डे १७१ अध्यायात् १८८ अध्यायपर्यंत भगवद्गीता

माहात्म्यमुपवर्णितं तथा च भगवद्गीतायाः प्रत्यध्यायं अस्य माहात्म्यस्यात्यैकैको ऽध्यायो दत्तः तत्सम्बन्धिन्यः कथाश्चापि तत्र वर्तन्ते । अन्यच्च वराहपुराणे ऽप्यस्त्येकं गीता माहात्म्यं ; शैव अथवा वायुपुराणेऽप्यस्त्येकं तृतीयं गीतामाहात्म्यमिति किंवदन्ती ।

किंवदन्ती । ×

किन्त्वस्माभिः कालिकाता नगरे मुद्रिते वायुपुराणे तन्नोपलब्धम् । "गीताध्यान" मित्येकं नवश्लोकात्मकं प्रकरणं भगवद्गीतायाः मुद्रितपुस्तकस्य प्रारंभे निर्दिष्टं वर्तते । तत्कुतः उद्धृतं इति तु न ज्ञायते । किंतु तत्रस्थः "भीष्मद्रोणतटा जयद्रथजला०" इत्ययं श्लोकः अल्पशः शब्दभेदेन अधुना प्रसिद्धिपथमागते भासकवेः "ऊरुभंगा"ख्य नाटकस्य प्रारंभे वर्तते । अतः एतत् ध्यानं प्रायः भासकवेः कालादनन्तरं प्रचारपथमवतीर्णमिति मन्यामहे । विख्यातेन भासकविना अयं श्लोकः गीताध्यानादुद्धृतः इत्यनुमानापेक्षया गीताध्यानमेव भिन्नभिन्नस्थलस्थितश्लोकानुद्धृत्य कांश्चिन्नूतनानपि विरचय्य निर्मितमित्यनुमानं सयुक्तिकं स्यात् । अयं भासकविः कालिदासात्पूर्वमासीदित्यतः तस्य समयः शालिवाहनशकस्य तृतीय शतकादर्वाचीनतरो भवितुं नार्हति[१] । *

उपर्युक्त वृत्तान्तात् भगवद्गीतायाः केके च्यानुवादाः, पूर्णा अपूर्णाश्च प्रतिकृतयः, तात्पर्याणि अथवा माहात्म्यानि पुराणेषूपलभ्यन्ते इति स्पष्टं भवति । अवधूत, अष्टावक्र इत्यादि कतिपय गीताः केषु पुराणेषु विद्यन्ते याश्च पुराणेष्वनुपलब्धाः तासां स्वातन्त्र्येण रचना कदा केन च कृता इति तु नोपलभ्यते । तथाप्येतेषां सर्व गीताख्यग्रंथानां रचना अथवा तदंतर्गत विषयसंगतिः यदि परीक्ष्येत तर्हि एते सर्वे ग्रंथाः भगवद्गीतायाः प्रसिद्ध्यनंतरं तस्याश्च लोकैः मान्यत्वेन स्वीकरणानंतरं रचिताः इति सिद्ध्यति । किंबहुना, भगवद्गीता सदृशी काचनगीता स्वकीये विशिष्ट सम्प्रदाये अथवा पुराणे यदि न स्यात् तर्हि तत्पूर्ततैव न स्यादिति कल्पनया एतासां भिन्नभिन्नं गीतानां निर्मितिर्जाता इत्यनुमानमपि समीचीनं भवेत् । यथाहि भगवद्गीतायां भगवता अर्जुनं प्रति विश्वरूपं दर्शयित्वा ज्ञानोपदेशः कृतः इति वर्णनमस्ति तथैव शिवगीतायां, देवीगीतायां, गणेशगीतायां चापि वर्णनम्, तथैव शिवगीता, ईश्वरगीता इत्यादि ग्रंथेषु भगवद्गीतास्थाः बहवः श्लोकाः अक्षरशः समुद्धृताः समुपलभ्यन्ते । एतासां गीतानां ज्ञानदृष्ट्या भगवद्गीतातो नास्ति को ऽपि विशेषः अध्यात्मज्ञानस्य कर्मणश्च समन्वयस्य भगवद्गीतायाः या